## ङः सि धुट्। (२९/१३१)

ङकारान्तात् पदात् उत्तरस्य [1]सकारादेः पदस्य वा धुडागमो भवति। [2]श्वलिट्त्साये, [3]श्वलिट् साये। मधुलिट्त्साये, मधुलिट् साये। परादिकरणं 'न पदान्ताट् टोरनाम्' (८.४.४२/११४) इति ष्टुत्वप्रतिषेधार्थम्॥

## नश्च। (३०/१३२)

नकारान्तात् पदात् उत्तरस्य सकारस्य वा धुडागमो भवति। भवान्त्साये, भवान् साये। महान्त्साये, महान् साये। धुटः [4]चर्त्वस्य च असिद्धत्वात् 'नश्छव्यप्रशान्' (८. ३. ७/१४०) इति रुत्वं न भवति[5]॥

## शि तुक्। (३१/१३३)

[6]नकारस्य पदान्तस्य शकारे परतो वा तुगागमो भवति। भवाञ्च्छेते। पूर्वान्तकरणं छत्वार्थम्। यद्येवं कुर्वञ्च्छेते इत्यत्र नकारस्य [7]अपदान्तत्वात् णत्वं प्राप्नोति? तत्र समाधिमाहुः, 'स्तोः श्चुना श्चुः' (८. ४. ४०/१११) इत्यत्र योगविभागः क्रियते, णत्वप्रतिषेधार्थं स्तोः श्चुना [8]णकारो न भवति इति, ततः श्चुः इति॥

## ङमो ह्रस्वादचि ङमुण् नित्यम्। (३२/१३४)

ह्रस्वात् परः यो ङम्[9] तदन्तात् पदात् उत्तरस्य अचः ङमुडागमो भवति नित्यम्। [10]ङणनेभ्यो यथासङ्ख्यं ङणना भवन्ति। ङकारान्तात् ङुट् – प्रत्यङ्ङास्ते[11]। णकारान्तात् णुट् – वण्णास्ते। वण्णवोचत्। नकारान्तात् नुट्–कुर्वन्नास्ते[12]। कुर्वन्नवोचत्। [13]कृषन्नास्ते। कृषन्नवोचत्। ङमः इति किम्? त्वमास्से। ह्रस्वात् इति किम्? प्राङास्ते। [14]भवानास्ते। अचि इति किम्? [15]प्रत्यङ् करोति। इह [16]परमदण्डिनौ, परमदण्डिना इति 'उत्तरपदत्वे चापदादिविधौ (भो. सू. ४४) इति प्रत्ययलक्षणप्रतिषेधादुत्तरपदस्य पदत्वं नास्ति इति ङमुट् न भवति। अथ वा, 'उञि च पदे' (८.३.२१/१७०) इत्यतः सप्तम्यन्तं पदे इत्यनुवर्तते। तेन अजादौ पदे[17]ङमुट् भवति॥

## मय उञो वो वा। (३३/१०८)

मय उत्तरस्य उञो वा [18]वकारादेशो भवति अचि परतः। शम्वस्तु (वा. सं. २३.४४) वेदिः, शमु अस्तु वेदिः। [19]तद्वस्य परेतः, तदु अस्य परेतः। [20]किम्वावपनम्, किमु आवपनम्। प्रगृह्यत्वात् उञः प्रकृतिभावे प्राप्ते वकारो विधीयते। तस्य असिद्धत्वाद् हलि इति 'मोऽनुस्वारः' (८.३.२३/१२२) न भवति॥

---

1. सकारादेः नास्ति इ, सकारस्य क. 2–3. स्वलिट् ड. 4. चुत्वस्य ब. ह. 5. किं पुनरुभयोरसिद्धत्वे सति इत्यधिकम् ह. 6. नकारान्तस्य पदस्य इ. 7. पदान्तत्वात् 8. संनिपाते इत्यधिकम् ब. 9. पदान्तः तस्मादुत्तरस्य क. 10. ङणनेभ्यो नास्ति क. 11. उदङ्ङास्ते इत्यधिकम् ड. 12. विशन्नास्ते इत्यधिकम् ड. 13. उदाहरणमिदं नास्ति ड. 14. उदाहरणमिदं नास्ति क. 15. पचन् करोति ब. ड. इ. फ, उदङ् करोति इत्यधिकम् ड. 16. परमदण्डिनौ नास्ति क. ब. इ, उत्तरदण्डिना ह 17. ङमुडागमो क. इ. 18. वकार आदेशः क. 19. तदु अस्यारतः तद्वस्यारतः इ, तद्वस्य रेतः तदु अस्य रेतः ह. 20. उदाहरणमिदं नास्ति क.